# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर्-दिसम्बर् - २०१६

| | | |
|---|---|---|
| कक्षा - शास्त्रितृतीयवर्षम् (SEM-5) | **प्रश्नपत्रम्** - ५ | गुणाः - ७० |
| विषयः - नव्यव्याकरणम् | **कोड** - C.C-3.5.9 | समयः - ११:०० तः २:०० |
| दिनाङ्कः - २९.११.२०१६ | सन्दर्भग्रन्थः - परिभाषेन्दुशेखरः, वाक्यपदीयं च | |

---

प्रथमान्वितिः (युनिट - १)

प्रश्नः- १ निम्नलिखितासु परिभाषाद्वयं व्याख्येयम् (८)

क. सर्वो द्वन्द्वो विभाषयैकवद्भवति।

ख. सर्वे विधयश्छन्दसि विकल्प्यन्ते॥

ग. प्रकृतिवदनुकरणं भवति

प्रश्नः- २ निम्नलिखितयोः एका परिभाषा सावतरणं व्याख्येया- (८)

क. यस्मिन्विधिस्तदादावल्ग्रहणे।

ख. एकदेशविकृतमनन्यवत्॥

प्रश्नः- ३ निम्नलिखितेषु द्वयोरुपरि टिप्पणी लेख्या- (४)

क. नन्वेवं 'भिन्धी'त्यत्र परत्वात् तातङा बाधितो धिर्न स्यात्।

ख. पुनः प्रसङ्गविज्ञानात्सिद्धम्।

ग. नन्वेवम् 'एधते' इत्यादौ परत्वाद्विकरणे "अनुदात्तङितः" इत्यादिनियमानुपपत्तिस्तेन व्यवधानात्

प्रश्नः- ४ निम्नलिखितेषु प्रश्नेषु पञ्चनां प्रश्नानां लघूत्तरंलेख्यम्- (५)

क. विकरणेभ्यो को बलवान् भवति?

ख. वृक्षेभ्यः इत्यत्र पूर्वपरयोः कतरत् सूत्रं प्रवर्तते?

ग. तुदति इत्यत्र गुणापेक्षया शः कस्मात् क्रियते?

घ. अल्पापेक्षं किं भवति?

ङ. को नाम विप्रतिषेधः?

च. 'अन्तरङ्गसूत्रापेक्षया अपवादसूत्रं बलवद्भवति अस्योदाहरणं किम्?

छ. प्राग्दीव्यतोऽण् इति सूत्रं कस्याः परिभाषायाःज्ञापकम्?

द्वितीयान्वितिः (युनिट - २)

प्रश्नः- ५ निम्नलिखितासु परिभाषाद्वयं व्याख्येयम् (८)

क. पूर्वोत्तरपदनिमित्तकार्यात् पूर्वमन्तरङ्गोऽप्येकादेशो न

ख. अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते

ग. वार्णादाङ्गं बलीयो भवति

प्रश्नः- ६ निम्नलिखितयोः एका परिभाषा सावतरणं व्याख्येया- (८)

क. नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः।

ख. असिद्धं बहिरङ्गमन्तरङ्गे।

प्रश्नः- ७ निम्नलिखितेषु द्वयोरुपरि टिप्पणी लेख्या- (४)

क. नन्वेवमपि 'अक्षद्यू'रित्यादौ बहिरङ्गस्योठोऽसिद्धत्वादन्तरङ्गो यण् न स्यात्
ख. नन्वेवं सेदुष इत्यादौ क्वसोरन्तरङ्गत्वादिटि ततः सम्प्रसारणेऽपीटः श्रवणापत्तिरिति चेत्?
ग. नित्यत्वादप्यन्तरङ्गं बलीयः अन्तरङ्गे बहिरङ्गस्यासिद्धत्वात्

प्रश्नः- ८ निम्नलिखितेषु प्रश्नेषु पञ्च प्रश्नाः समाधेयाः - (५)
क. अन्तरङ्गबहिरङ्गयोर्मध्ये किं बलवद्भवति?
ख. अन्तर्भूतानि अंगानि=निमित्तानि यस्य तत् किं भवति?
ग. शब्दशास्त्रे कस्य प्रधानता भवति?
घ. 'असिद्धं बहिरङ्गमन्तरङ्गे' परिभाषायां किं निमित्तमेव गृह्यते?
ङ. 'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः' अस्याः परिभाषायाः ज्ञापकं किम्?
च. 'वार्णादाङ्गं बलीयो भवति' अस्याः परिभाषायाः ज्ञापकं किम्?
छ. 'अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते अस्याः परिभाषायाः ज्ञापकं किम्?

## तृतीयान्वितिः (युनिट - ३)

प्रश्नः- ९ निम्नलिखितेषु श्लोकद्वयमाश्रित्य व्याख्या कार्या- (८)
क. अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।
जन्मादयो विकाराः षड् भावभेदस्य योनयः॥
ख. आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः॥
ग. तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।

निम्नलिखितयोः एकस्य प्रश्नस्य उत्तरं लेख्यम्- (८)
क. शब्दब्रह्मणः स्वरूपं प्रतिपाद्यताम्।
ख. वाक्यपदीयानुसारं व्याकरणमहत्त्वं प्रतिपादयत।

प्रश्नः- ११ निम्नलिखितयोः विषयमेकमाश्रित्य टिप्पणी लेख्या- (२)
क. विवर्तः
ख. षड्-भावभेदाः

प्रश्नः- १२ निम्नलिखितेषु प्रश्नद्वयस्य उत्तरं देयम् (२)
क. अनादिनिधनं किमस्ति?
ख. 'अक्षरम्' इत्यस्य कोऽर्थः?
ग. जगतः प्रक्रिया कुतः विवर्तते?
घ. शब्दार्थसम्बन्धाः कीदृशाः वर्तन्ते?

***